**विषय कोडः ६११**

# NEB - GRADE XII

## ज्योतिषम् (उत्तरमध्यमा पाठ्यक्रम)

## तृतीयपत्रम्

*परीक्षार्थिभिः प्रश्नस्योत्तरं यथासंभवं स्वकीयैः शब्दैर्लेखनीयम् । दक्षिणपार्श्वे सन्निविष्टा अङ्काः पूर्णाङ्कान् द्योतयन्ति ।*

**समयः घण्टात्रयम्** **पूर्णाङ्का : १००**

**एकः** प्रश्नः समाधेयः । १५

१. २०७५ कार्तिकशुक्लैकादश्यां सोमवासरे अहर्गणः साध्यः ।

२. यत्राहर्गणः = २३४५ तत्राहर्गणोत्पन्नौ रविचन्द्रौ साध्यौ ।

**एकः** प्रश्नः समाधेयः । १५

३. भौमादीनां स्पष्टगतिसाधनपद्यं लिखित्वा व्याख्या कार्या ।

४. क्षितिजोऽष्टयमेरुदेति पूर्वे ... इत्यादिपद्यस्य कोऽभिप्रायः ?

**द्वौ** प्रश्नौ समाधेयौ । २×१०=२०

५. यदा चन्द्रकेन्द्रं ८।४.५ रविकेन्द्रं ७२.५ तदा अनयोर्गती साध्ये ।

६. यत्र स्पष्टरविचन्द्रयोर्योगः ५।२४।९।३६ तयोर्गतियोगः ८४९।४५ तत्र वर्तमानयोगस्य गतगम्यकालौ साध्यौ ।

७. २०७५वैक्रमाब्दस्य ब्राह्ममतेन वर्षान्तीया ध्रुवाः साध्याः ।

८. नक्षत्रभुक्तकलाः २१०.४ चन्द्रकेन्द्रम् ८।२.७ अत्र नक्षत्रपराख्यः कः ?

**त्रयः** प्रश्नाः समाधेयाः । ३×१०=३०

९. यत्र सायनरविः ३।८।४।१०, सायनलग्नम् ५।१०।१५।२५ तत्राभीष्टं राश्युदयमानं परिकल्प्येष्टकालः साध्यः ।

१०. यत्र रविः १।५।५२।४० अयनांशाः १८।१० तत्र स्थूला क्रान्तिः का ?

११. यत्र चन्द्रबिम्बम् ११।७ भूभा २८।१० शरः २।५० ग्रासः ५।४० तत्र स्थितिमर्दकालौ कौ ?

१२. दिक्साधनं कथं क्रियते ?

१३. यत्र व्यगुभुजांशाः ५।२३।४७।७ ऋणलम्बांशाः ०।११ तत्र शरः साधनीयः ।

**चत्वारः** प्रश्नाः समाधेयाः । ४×५=२०

१४. भूकेन्द्रपृष्ठकेन्द्रयोः किं लक्षणम् ?

१५. अक्षांशलम्बांशयोः का परिभाषा ?

१६. कुज्याचरज्ये के ?

१७. किं नाम लम्बनम् ?

१८. शङ्कोः परिचयो देयः ।

१९. वलनज्ञानप्रकारः कः ?

समाप्तम्